# संस्कृत-वार्ता:

**दिनाङ्क :- 30.06.2024** **सायम् - 06:20**

## मुख्यवार्ता:

- संस्कृतवार्ता-सम्प्रषारणस्य अयं पञ्चाशततम: वर्ष: अस्ति, इति मत्वा प्रधानमन्त्रिणा आकाशवाणी-परिवारं प्रति **मन की बात** इति कार्यक्रमे शुभाशंशा: सन्ति सम्प्रेषिता:।
- प्रधानमन्त्रिणा संविधानसंहितां प्रति, राष्ट्रस्य लोकतान्त्रिक-व्यवस्थां प्रति च जनविश्वासाय जनेभ्य: धन्यवादा: प्रदत्ता:।
- प्रधानमन्त्रिणा श्रीमोदिना अस्मिन् वर्षे पर्यावरण-दिवसावसरे समारब्धस्य **'एक पेड़ मॉ के नाम'** इति कार्यक्रमस्य विषये उक्तं यत् स्वकीयया मात्रा सह उतो वा मातु: नाम्ना एक: पादप: रोपणीय: इति।
- जनरल-उपेन्द्र-द्विवेदी इत्यनेन अद्य दिल्ली-नगरे सेनाध्यक्षरूपेण कार्यभारं स्वीकृतम्।
- भारतीय-ऋतुविज्ञानविभागेन आगामिषु द्वित्रिषु दिवसेषु उत्तरभारतस्य कतिपय-भागेषु दक्षिण-पश्चिम वर्षर्तो: वरीवर्धनाय परिस्थितय: अनुकूला: सन्तीति उक्तम्।

## प्रधानमन्त्री 'मन की बात'

प्रधानमन्त्री नरेन्द्र-मोदी अद्य स्वकीये आकाशवाणीत: प्रसारिते **'मन की बात'** इति कार्यक्रमे देशवासिन: प्रति आभारभावान् व्यक्तीकृतवान्। तेन संविधानसंहितां प्रति, राष्ट्रस्य लोकतान्त्रिक-व्यवस्थां प्रति च जनविश्वासाय, सामान्य लोक-सभानिर्वाचनानन्तरं प्रसारिते अस्मिन् एकादशोत्तर-एकशततमे मन की बात इति धारावाहिके कार्यक्रमे अद्य प्रात: एकादशवादने राष्ट्रं सम्बोधयता उक्तं यत् अस्य वर्षस्य निर्वाचनम् विश्वस्य सर्वाति बृहत्तमं निर्वाचनमासीदिति। यत्र पञ्चषष्टिकोटिजनै: मतदानं कृतम्। श्रीमोदिना अस्मिन् वर्षे पर्यावरण-दिवसावसरे समारब्धस्य **'एक पेड़ मॉ के नाम'** इति कार्यक्रमस्य विषयेऽपि चर्चा कृता। तेनोक्तं यत् स्वकीयया मात्रा सह उतो वा मातु: नाम्ना एक: पादप: रोपणीय: इति। योगस्य विषये चर्चां कुर्वन् प्रधानमन्त्री उक्तवान् यत् आसंसारं दशम: विश्वयोगदिवस: सोत्साहेन परिपालित:। तेनोक्तं यत् योगदिवसस्य आयोजनं यथायथं अग्रे वर्धते, तथैव नूतन-कीर्तिमदपि संरचयदस्ति। प्रधानमन्त्रिणा एतदपि उक्तं यत् अग्रिममासस्य अस्मिन्नेव कालांशे पेरिस-ओलम्पिकाख्य: क्रीडाकुम्भ: समारप्स्यति। तेनोक्तं यत् अस्मिन् क्रीडाकुम्भे कतिपय प्रकरणानि पप्रथमतया दृष्टिपथं समायास्यन्ति। प्रधानमन्त्री उक्तवान् यत् आराष्ट्रम् इच्छति यत् क्रीडका: पदकानि संगृह्य प्रत्यावर्तयेयुरिति। प्रधानमन्त्री मोदी उक्तवान्

यत् कुवैतप्रशासनेन स्वकीये आकाशवाणी कार्यक्रमे एक: कार्यक्रम: हिन्दीभाषाया: अपि समारब्धोऽस्ति।

संस्कृतवार्ता-सम्प्रषारणस्य अयं पञ्चाशततम: वर्ष: अस्ति, इति मत्वा प्रधानमन्त्रिणा आकाशवाणी-परिवारं प्रत्यपि शुभाशंशा: सन्ति सम्प्रेषिता:।

**पीएम बाइट**

ध्यातव्यमस्ति यत् आकाशवाण्याः संस्कृतवार्तावर्गस्य स्वर्णजयन्तिवर्षः अद्यारभते। संस्कृतवार्तायाः प्रथमप्रसारणं चतुस्सप्तत्यधि-कैकोनविंशत्तमख्रिष्टाब्दस्य जूनमासस्य त्रिंशत्तमदिनाङ्कतः आकाशवाणीकेंद्रात् समारब्धम्। पूर्वं पञ्चनिमेषात्मिका दैनिकसंस्कृतवार्ता प्रातः नववादने सम्प्रसारिता, तदुपरान्ते च अस्याः प्रसारणकालः पञ्चोनसप्तवादनमजायत। दशनिमेषात्मकञ्च द्वितीयप्रसारणं सन्ध्यायां दशाधिकषड्वादने अभवत्, अनन्तरञ्च कालोऽयं परिवर्त्य विंशतिनिमेषाधिकषड्वादनमभवत्। स्वस्यां विशिष्टशैल्यां, आकाशवाणीवर्गः विगतैकोनपञ्चाशत्वर्षेभ्यः भारतस्य नागरिकान्तं यावत् संस्कृतभाषायां संस्कृतवार्ताः प्रापयन्नस्ति।

प्रधानमन्त्रिणा **मन की बात** इति कार्यक्रमे अग्रे उक्तं यत् जूनमासस्य त्रिंशद्दिनाङ्क: इतोऽपि एकेन कारणेनापि विशिष्ट: अस्ति, यतो हि दिवसोऽयं हलदिवसरूपेणापि परिपाल्यते। तेनोक्तं दिवसोऽयं झारखण्डस्य वीरयो: सिद्धु-कान्हू चेत्येतयो: साहसपराक्रमेण सम्बद्धोऽस्ति। याभ्यां-ब्रिटिश-अत्याचाराणां विरोध: विहित: आसीत्। प्रधानमन्त्रिणा **मन की बात** इति कार्यक्रममाध्यमेन जनैस्सह संयोजने साफल्याय प्रसन्नता अस्ति प्रकटिता। नेतोक्तं यत् **मन की बात** इति कार्यक्रमे भारतस्य समृद्ध संस्कृतिविषये, इतिहास-विषये विकसितभारतस्य विनिर्माणे च परिचर्चा सातत्यं प्रवहिष्यतीति।

**जनरल-उपेन्द्र-द्विवेदी**

जनरल-उपेन्द्र-द्विवेदी इत्यनेन अद्य दिल्ली-नगरे सेनाध्यक्षरूपेण कार्यभारं स्वीकृतम्। जनरल-मनोज-पाण्डेय: चतुरधिकदशकेभ्य: विशिष्ट सेवां प्रदाय अद्य सेवानिवृत: अभवत्। स्वकीये सुदीर्घकार्यकाले स: विविध-पदेषु सेवाम् अयच्छत्।

**जयशंकर:**

विदेशमन्त्री सुब्रह्मण्यम् जयशंकर: अद्य कतर-देशस्य यात्रायां गच्छति। विदेश-मन्त्रालयेन प्रोक्तं यत् एक-दिवसीय यात्रावधौ डॉ. जयशंकर कतर-देशस्य प्रधानमन्त्रिणा विदेशमन्त्रीणा च शेख-मोहम्मद-बिन-अब्दुल-रहमान-बिन-जसीम-अल-सानी इत्यनेन सह मेलनं करिष्यति। डॉ् जयशंकर द्वयो: देशयो: मध्ये राजनीतिकं व्यापारिक विनिवेश-ऊर्जा-सुरक्षा-सांस्कृतिक-परस्पर हिताधारित: विषयेषु च क्षेत्रीय-अन्ताराष्ट्रिय च विषयैस्सह द्विपक्षीय-सम्बधानां समीक्षामपि करिष्यति। मन्त्रालयेन प्रोक्तं यत् भारत-कतर देशयो: मध्ये ऐतिहासिक-मैत्रीपूर्णश्च सम्बन्ध: वर्तते।

**ऋतुवार्ता:**

भारतीय-ऋतुविज्ञानविभागेन उक्तं यत् आगामिषु द्वित्रिषु दिवसेषु पश्चिमराजस्थान, हरियाणा, चण्डीगढ, पंजाबस्य कतिपय भागेषु पश्चिमोत्तरप्रदेश, हिमाचलप्रदेश, जम्मो: अवशिष्ट भागेषु च दक्षिण-पश्चिम वर्षर्तो: वरीवर्धनाय परिस्थितय: अनुकूला: सन्तीति। विभागेनोक्तं यत् उत्तराखण्ड, हिमाचलप्रदेश, पंजाब, हरियाणा, चण्डीगढ़, उत्तरप्रदेश, पूर्वीराजस्थान, मध्यप्रदेशे च त्रिचतुर्दिवसेषु उन्कटवर्षाया: अस्ति सम्भावना।

**महिला क्रिकेटनिकषस्पर्धा**

महिला-क्रिकेट-स्पर्धायां भारतीय चक्रीयकन्दुकक्षेपिकया स्नेहा-राणा इत्यनया एम.ए. चिदम्बरं क्रिकेट क्रीडाङ्गणे एकाक्यां निकषक्रिकेटस्पर्धायां तृतीये दिवसे दक्षिण-अफ्रीकां विरुध्य अष्टक्रीडकान् सम्पात्य कीर्तिमत् विरचितम्। अवशिष्टे च द्वे क्रीडिके दीप्ति शर्मा इत्यनया पातिते। सम्प्रति दक्षिण अफ्रीकाया: महिला दलम् फालो-ऑन-इति क्रीडां-क्रीडति।

**।। इति वार्ता: ।**